Gyanshauryam, International Scientific Refereed Research Journal
Available online at : www.gisrrj.com
OPEN ACCESS
© 2024 GISRRJ | Volume 7 | Issue 1 | ISSN : 2582-0095

# वैदिकस्वरविचारे एकश्रुति निरूपणम्

डा. के. तारकरामकुमार शर्मा
आचार्यः, श्री वेङ्कटेश्वर वेदविश्वविद्यालयः, तिरुपति

**Article Info**
Volume 7, Issue 1
**Page Number :** 109-113

**Publication Issue :**
January-February-2024

**Article History**
Accepted : 10 Jan 2024
Published : 30 Jan 2024

**लेखसंक्षेपः-** वैदिकसम्प्रदाये मन्त्राणां समुच्चारणं सस्वरमेव कर्त्तव्यं भवति, स्वरविहीनस्य मन्त्रस्य पाठनिषेधात्। सेयं परम्परा अनादिकालात् प्रवर्तिता विद्यते। मुख्यरूपेण स्वराः त्रिविधाः भवन्ति उदात्तानुदात्तस्वरितभेदात् । क्वचित् प्रचयेन सह चातुस्वर्य व्यवहारो वर्तते। छन्दोगास्तु सामवेदे सप्तस्वराणां विधानं निर्दिशन्ति, यज्ञप्रयोगेषु उदात्तानुदात्तस्वरितानां स्पष्टप्रयोगं हित्वा तत् स्थाने एकश्रुतिस्वरस्य प्रयोगः कर्तव्यः इति सुप्रसिद्धम्। पाणिनीयव्याकरणे **एकश्रुति दूरात् सम्बुद्धौ**[1] इति सूत्रविहितः एकश्रुतिस्वरः एतस्यैव एकश्रुतिस्वरविशेषस्य निरूपणात्मकोयं शोधलेखः।

**कुञ्चिका पदानि** – उदात्तः, अनुदात्तः, स्वरितः, प्रचयः, एकश्रुतिः, भाषिकस्वरः, यज्ञकर्म, सामवेदः, यजुर्वेदः, ब्राह्मणम्, आरण्यकम्, न्यूङ्खाः, वषट्कारः, अनुदात्ततरः, उदात्ततरः, महाभाष्यम्, काशिका, तैत्तिरीयप्रातिशाख्यम् ।

**स्वरपरिचयः-** त्रैस्वर्यरूपा साप्तस्वरूपा च वैदिकसंहितासु स्वख्यवस्था प्रचलति। ब्राह्मणग्रन्थानामुच्चारणे भाषिकस्वरप्रयोगः क्रियते । भाषिकस्वरे उदात्तानुदात्तौ द्वावेव स्वरौ भवतः। कृष्णयजुर्वेदीयं तैत्तिरीयं ब्राह्मणम् एतस्य अपवादरूपम्। तत्र संहिताब्राह्मणारण्यकानां युगपत् पाठात् भाषिकस्वरौ न भवतः अपितु उदात्तानुदात्तस्वरिताप्रचयानामेव स्वराणां तत्र प्रवृत्तिः । एषां स्वराणामवान्तरभेदाः अपि भवन्ति, एतत् तत्र उदात्तादिस्वराणां सप्तधा विभाजनं कृतं वर्तते । तत्र निषादगान्धारी उदात्ती, लभधैवतौ अनुदात्तौ षड्जमध्यमपञ्चमाश्च स्वरिताः भवन्ति।

एकश्रुतिपरिभाषा स्वरूपं आचार्यैः बहुधा निरूपितम्–

1. तत्र भगवान् पतञ्जलिः उदात्तानुदात्तोभयसमाहाररूपा एकश्रुतिः।
2. महाभाष्यस्य टीकाकारः कैयटः क्षीरोदकवदुदात्तानुदात्तयोर्भेदतिरोधानमेकश्रुतिः। स्वरिते तु विभागेन तयोरुपलब्धिः।
3. काशिकाकारस्तु उदात्तादीनां त्रयाणां स्वराणां भेदाभावः एकश्रुतिः ।
4. आश्वलायनश्रौतसूत्रं तु उदात्तानुदात्तस्वरितानां परः सन्निकर्ष ऐकश्रुत्यम् ।
5. नारायणकृतायाम् आश्वलायन श्रौसूत्रवृत्तौ तु उदात्तादीनाम्मभियञ्जकाः ये प्रयत्नाः तेषामन्यतमस्यैव प्रयत्नान्तरेण व्यवधानमन्तरा उच्चारणमिति एकश्रुतिः ।
6. तैतिरीयप्रातिशाख्ये तु उदात्तसंश्रुतिः एकश्रुतिः भवति ।
7. मनोरमाकारस्तु एकश्रुतिः प्रचय इति पर्यायौ इति निरूपयति ।

**Copyright: ©** the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

उक्तासु एकश्रुतिपरिभाषासु आश्वलायनीयः पक्षः एव हृदयङ्गमः भवति। यतोहि स एका समानाकारा एकश्रुतिः इति वदति। अनया रीत्या प्रातिशाख्यामपि न विरुन्धे । इयमेकश्रुतिरेव कात्यायनेन तानपदेन व्यवहृता ।

एवञ्च स्वरः षड्विधः - उदात्तः, उदात्ततरः, अनुदात्तः, अनुदात्ततरः, स्वरितः, एकश्रुतिश्च इति। महाभाष्ये तु स्वरितभागमुदात्तं पृथक्कृत्य सप्तस्वराः इत्युक्तम् । अवान्तरभेदपरिहारेण तु सर्वत्र त्रैस्वर्यव्यवहारः । प्रचयाख्यैकश्रुत्या सह चातुः स्वर्यव्यवहारोऽपि क्वचित् ।

कचित् तु शाखायां द्वावेव उदात्तानुदात्तौ स्वरौ भवतः। तथा च कात्यायनः। **स्वरितानुदात्तौ च उदात्तमनुदात्तमनन्त्यम्**। मन्त्रविषये यौ स्वरितानुदात्तौ तावपि शतपथब्राह्मणे उदात्तौ स्तः, मन्त्रधर्मेण यदुदात्तमभिहितं तत् शतपथब्राह्मणे अनुदात्तं स्यात् । तथा स्वर्यमपि केषाञ्चित् । मन्त्रस्वरवत् ब्राह्मणस्वरश्चर्काणां तेषां खाण्डिकीयौ स्वीयानां चातुः स्वर्यमपि क्वचित्। वार्तिककारोऽपि स्वरविधौ छन्दोऽधिकारमनुपसञ्चक्षाणो भाषायां स्वरसद्भावमनुमनुते ।

**सर्वत्र वेदे स्वर्यसद्भावः**

अथ वेदेषु ऐतरेय ब्राह्मणादिषु इदानीमिव सर्वदा त्रैस्वर्याभावः ? उत कालान्तरे स्थितं त्रैस्वर्यं विच्छिन्नसम्प्रदायमभूत् ? अत्र भट्टोजिदीक्षिताः सर्वेषु वेदभागेषु त्रैस्वर्यं न स्वीकरोति अपितु विभाषया त्रैस्वर्यम् ऐकश्रुत्यं च छन्दसि विदधाति । तत्र बचानां मन्त्रे स्वर्यं, ब्राह्मणे ऐकश्रुत्यमेव इति व्यावस्था । तैत्तिरीयाणां मन्त्रब्राह्मणयोरुभयोरपि त्रैस्वर्यमिति । न चायमैच्छिको विकल्पः, वेदे आपाद्यमानरूपाभावात् ।

वृत्तिकारहरदत्तनागेशास्तु ऐच्छिकविकल्पमङ्गीकृत्य छन्दसि सर्वत्र एकश्रुतिः त्रैस्वर्येण विकल्प्यते इति वदन्ति । तथा च शब्देन्दुशेखरे परे तु मन्त्रे त्रैस्वर्यं ब्राह्मणे ऐकश्रुत्यमिति बह्वचानाम् । तैत्तिरीयाणां तु मन्त्रब्राह्मणयोः उभयत्रापि त्रैस्वर्यमिति। व्यवस्थाविभाषात्वमस्य छन्दसि स्वीकृतं कैश्चित्। तन्न युक्तं शाच्छोः इति सूत्रे भाष्ये परिगणितव्यवस्थितविभाषास्वपाठात्। अत एव केषुचिद् स्वाध्यायकाले सर्ववेदानामैकश्रुत्येन पाठो दृश्यते । **एकश्रुतिः स्वरसर्वनाम** इति भाष्येणापि एवम् अवगमनाच्च। यथा सर्वनामशब्दाः तदादयः सर्वपदस्थाने प्रयुज्यन्ते। एवं सर्वनामस्वरस्थाने एकश्रुतिः प्रयोक्तव्या इति तदर्थः। अनेन स्पष्टमेव त्रैस्वर्यैकश्रुत्ययोरैच्छिकविकल्पविषया उक्ता। वृत्तिकारोऽपि छन्दसि ऐच्छिकमेवैक श्रुत्यमाह।

**एकश्रुतिः त्रैस्वर्यलोकहेतुः**

एवं लोकवेदसाधारणमपि त्रैस्वर्यं काले गच्छति यज्ञकर्मणि वेद एव लब्धास्पदया एकश्रुत्या अभिभूयते स्म । अत्र कानिचित् कारणानि निर्दिशामः

1. ब्राह्माणानि लुप्तत्रैस्वर्याणि पुरुषार्थसाधनतया अध्येयानि समवृत्तानि। विस्वरश्च वेदभागो नाध्येतुमहं इति एकश्रुत्या तदध्ययनसम्प्रदायः समजनि ।
2. भाषायामलङ्काराः श्लेषादयः कविभिः आद्रियन्त । त्रैस्वर्यं च तत् विरोधि। न हि सर्वदो माधवः पायात् इत्यादि शिलष्टं काव्यम् अर्थद्वयसाधारण्येन त्रैस्वर्येण प्रयोक्तुं शक्यते। अतः आलङ्कारिकैः स्वप्रयोजनानुसारेण एकश्रुत्यैव काव्यानि निर्मितानि पठितानि च ।
3. वेदानधिकारिणां स्त्रीशूद्रादीनां धर्माद्यवगाहि हेतोः व्यासेन पुराणानि प्रणीतानि । तत्र पुराणेषु एकश्रुतिपाठः सुलभः स्वीकृतः ।
4. पूर्वोत्तरमीमांसे अधीयानाः वेदार्थं विचारयन्तोऽपि विचार्यमाणवेदभागम् एकश्रुत्याधीयते स्वरशास्त्राद् बिभ्यतः अतः क्लेशभूयस्त्वाद् भाषासु त्रैस्वर्यं परित्यक्तम् । आचार्यपाणिनिना एकश्रुतिसम्बद्धानि पञ्चसूत्राणि आरचितानि येषामुपरि क्रमेण विचारः क्रियते ।

**दूरात् सम्बोधने एकश्रुतिप्रयोग:**

**एकश्रुति दूरात् सम्बुद्धौ**[2] अत्र सूत्रे सम्बुद्धिः अनुष्ठेयतया सम्बोधनम्। सम्पूर्वात् बुधेः अन्तर्भावितण्यर्थात् क्तिन् । न त्वत्र **एकवचनं सम्बुद्धिः** इति कृत्रिमा सम्बुद्धिर्गृह्यते । दूरात् इत्यपादानकारकान्वयाय क्रियाया एव अपेक्षितत्वात् इति कैयटहरदत्तादयः। यावति देशे प्राकृतप्रयत्नोच्चारितं सम्बोध्यमानेन न श्रूयते, किन्तु अधिकं प्रयन्नमपेक्षते, तदिह दूरत्वं विवक्षितम्। उक्तं सम्बोधनकरणत्वं वाक्यस्यैव सम्भवतीति तस्यैवेदं विधानम्। एका श्रुतिर्यस्य तदिदमेकश्रुतिवाक्यम्। दूरात् अनुष्ठेयतया बोधनायां करणीभूतं वाक्यम् एकश्रुतिः स्यात् त्रैस्वर्यापवादः। **आगच्छ भो माणवक देवदत्त** । **दूराद्धूते** इति प्लुतः। स च निरवकाशत्वात् एकश्रुतिं बाधते। एकश्रुतिप्लुताभ्यां च अवयवभेदेन वाक्ये समुच्चिताभ्यां दूरात् सम्बोधनं द्योत्यते। दूरात् सम्बोधनाभावे त्रैस्वर्यमेव । तत्र **उपसर्गाश्चाभिवर्जनम्** इत्याङाद्युदात्तम्। गच्छ इति **तिङ्ङतिङः** इत्यनुदात्तम् । भो शब्दो निपातत्वात् आद्युदात्तः । इतरयोरामन्त्रितनिघातः । अत्र सम्बुद्धिः इत्यन्वर्थग्रहणात् आगच्छत ब्राह्मणाः इत्यत्रापि अयमेकश्रुतिः । यथा च शिक्षायाम्–

उदात्तनिहतस्वार प्रचयेभ्यो विलक्षणा ।
एकश्रुतिः ससूत्रेषु पञ्चप्रश्नेषु दृश्यते । ।

**शीक्षां व्याख्यास्यामः** इत्यत्र वेदभाष्येऽपि प्रचयात् विलक्षणा एकश्रुतिः सप्तस्वरूपा षड्गुरुशिष्यविरचिताश्वलायनवृत्तौ तु उदात्तानुदात्तस्वरितानाम् इति सूत्रमन्यथा व्याख्यातम्। परशब्दोऽतिशयार्थः। प्रत्यासत्तिः सन्निकर्षः भेदतिरोधानरूपः। **उच्चैरुदात्तः, नीचैरनुदात्तः, समाहारः स्वरितः** इति प्रसिद्धोदात्तादिस्वराणां भेदतिरोधानरूपमैकश्रुत्यम् । एक श्रुतिर्ध्वनिः यस्मिन् उच्चारणे तत् एकश्रुतिः । तस्य भावे ष्यञ् इति अत्रेत्थम् । एषां ग्रन्थानामविरोधमाहुः उच्चैर्निष्पन्नत्वनीचैर्निष्पन्नत्वलक्षणौ उपाधी द्वावेव उदात्तानुदात्तसंशब्दितौ स्वरौ। स्वरितस्तु तदुभयात्मको न ताभ्यां विलक्षणः इत्येकं मतम्। अन्यत्तु मतम् उदात्तादयस्त्रयस्वराः परस्परविलक्षणाः श्रोत्रग्राह्यजातिविशेषरूपाः । उच्चैरुदात्तः इत्यादिसूत्राण्यपि तादृशजातिविशेषोपलक्षणपराणि इति। तत्र आद्यमताभिप्रायेण उदात्तानुदात्तयोः भेदतिरोधानमेकश्रुतिः इति कैयटमतम्। द्वितीयमताभिप्रायेण उदात्तादीनामविभागेन अवस्थानमिति हरदत्तादयः । नारायणवृत्तिग्रन्थस्तु मतान्तरपरत्वेन नेयः। एकश्रुतिः प्रचयात् विलक्षणा भवति इत्यपि । मतान्तरम् । यद्वा गोबलीवर्दन्याय तत्रत्यः प्रचयशब्दः स्वरितात् संहितायाम् इति सूत्रमागगृहीतैकश्रुतिपरः। **विभाषा छन्दसि** इति विहिता तु एकश्रुतिः। तत्रत्यैकश्रुतिशब्दवाच्या इति ।

**यज्ञकर्मणि अजपादिषु विशेष:**

जपादीन् हित्वा यज्ञक्रियायां मन्त्रप्रयोगे एकश्रुतिः भवति। यथा – **अग्निर्मूर्धादिवः ककुत्पतिः पृथिव्या अयम् अपाग् रेतग्ंसि जिन्वति**[3]**।** यज्ञकर्मणि इत्युक्तेः स्वाध्यायकाले त्रैस्वर्यमेव । तत्रोदाहरणे समागतान् शब्दान् स्वरधिया विचारयामः। अत्र मन्त्रे अग्निशब्दः अङ्गेर्नलोपश्च इति न प्रत्ययान्तः प्रत्ययस्वरेण अन्तोदात्तः। मूर्धन् शब्दः कनिन्नन्तः श्वन्नक्षन् इति सूत्रे अन्तोदात्तो निपातितः । दिवः । ऊडिदम् इति विभक्तिरुदात्ता । ककुत् । फिट्स्वरेण अन्तोदात्तः। पार्तेर्डतिः, पतिः । प्रत्ययस्वरेण आद्युदात्तः । प्रथेष्टिवन् सम्प्रसारणं च । शिंत्वात् ङीष्। पृथिवी । आप्नोतेः क्विप् ह्रस्वश्च। अपू । ऊडिदम् इत्यनेन उदात्तः । सुरीभ्यां तुटू च इति असुनो नित्वात् आद्युदात्तो रेतश्शब्दः जिवि प्रीणने । नुष जिन्वति । तिङ्गनिघातः। यज्ञप्रयोगे तु प्रणवष्टेः इति टेः प्रणवः । जपादिपर्युदासात् मन्त्राणामेवेदम् ऐकश्रुत्यम् इति केचित् वदन्ति । प्रसज्य प्रतिषेधाश्रयाणाम् अमन्त्राणामपि ऊहादीनात् एकश्रुत्यम् इति मतद्वयमपि विभाषा छन्दसि इत्यत्र हरदत्तेन उक्तम् ? न च प्रसज्य प्रतिषेधपक्षे परत्वात् विभाषा छन्दसि इति पाक्षिकमैकश्रुत्यम् वेदमन्त्रेषु स्यात्, ऊहादिषु, अस्य विधेश्चरितार्थत्वात् इति वाच्यम्, यतः यज्ञकर्मणि इति कर्मग्रहणम् यज्ञानुष्ठानमात्रे सर्वत्र अनेनैव एकश्रुतिर्यथा स्यात् इत्येवमर्थम् इति हरदत्तः । पर्युदासपक्षे तु

कर्मग्रहणस्य चिन्त्यं फलम् । इदमेव पक्षद्वयमभिप्रेत्य मन्त्रो हीनः इति शिक्षावचने स्वरापराधो हरदत्तेन द्वेधा व्याख्यातः । तथाहि–

मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाह ।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रु स्वरतोपराधात् इति ।।

स्वरेण स्वरतः। आद्यादित्वात् तसिः। तदर्थप्रतिपादनाय प्रयुक्तः ततोऽर्थान्तरम्। स्वरवर्णदोषात् प्रतिपादयन् अभिमतमर्थं नाह इत्यर्थः । वागेव वज्रो वाग्वज्रः । यथेत्युदाहरणम् । इन्द्रशत्रुः इन्द्रशत्रुशब्दः । स हि स्वरकृतापराधात् यजमानं हिंसितवान् । एतत् च त्वष्टा हतपुत्रः इत्यनुवाके स्पष्टमभिहितम्। अत्र मन्त्राणामेवैकश्रुति इति पक्षे स्वाहेन्द्रशत्रुर्वर्धस्व इति त्वष्ट्रा स्वच्छन्दं प्रयुक्तस्य मन्त्रत्वाभावात् इन्द्रशत्रुः इति षष्ठी समासत्वात् अन्तोदात्तत्वे प्रयोक्तव्ये आद्युदात्तः प्रयुक्तः । आद्युदात्तत्वं च अत्र बहुव्रीहिस्वरः, इन्द्रशब्दस्य रन्नन्तस्य नित् स्वरेण आद्युदात्तत्वात् बहुव्रीहौ प्रकृत्या पूर्वपदम् इति वचनात् । ततो बहुव्रीहि अर्थोपसंहारातू इन्द्र एव अस्य शत्रुः अभवत् इति स्वरापराधः । न च इन्द्रस्य त्वष्टारं प्रति शत्रुत्वे त्वष्टुरुपरि इन्द्रं प्रति शत्रुत्वं सिद्धम् इति बहुव्रीहिषष्ठीसमासयोः न कदर्थभेद इति वाच्यम्, यतोऽत्र सपत्नपर्यायः न रूढः शत्रुशब्दः, अपि तु क्रियाशब्दो यौगिकः शातयिता शत्रुरिति । तत्र इन्द्रस्य शतायिता भूत्वा वर्धस्व इति षष्ठीसमासार्थः । बहुव्रीहौ तु इन्द्रशातयितृक इति विस्पष्टोऽर्थभेदः। अत्र प्रसज्यप्रतिषेधपक्षे तु ऐकश्रुते कर्त्तव्ये तदकरणमेव स्वरापराधः इति। जपादिविषये यज्ञकर्मण्यपि नैकश्रुत्यम् । तत्र जपो नाम उपांशुप्रयोगः यथा जले निमग्नस्य इत्येके। अकरणमन्त्र इत्यन्ये । अनेन इदं कुर्यात् इति विनियुक्तो मन्त्रः करणमन्त्रः इति पक्षद्वयं हरदत्तादिभिः निर्दिष्टम् ।

न्यूङ्क्षानाम षोडश ओङ्काराः । तेषु प्रथमसप्तमत्रयोदशास्त्रयः उदात्तास्त्रिमात्राश्च । इतरे त्रयोदश अनुदात्ताः अर्धीकाराश्च । एतच्च आश्वलायनीये सूत्रे वर्णितम् । सामशब्दो गीतिविशेषवाची। तदुक्तं गीतिषु सामाख्या इति । तत्र उपांशुप्रयोगोऽयं जपः इति पक्षो याज्ञिकानुसारी । अत एव **इषेत्वो**[4] इत्यादि कर्णमन्त्रानपि उपांशुप्रयुज्यमानान् ते चातुस्वर्येण प्रयुञ्जते। अग्नीदग्रीन् विहर इत्यादि सम्प्रेषांस्तु उच्चैः प्रयुज्यमानानेकश्रुत्या। अत एव आपस्तम्बसूत्रदीपिकायां ततः सम्प्रेष्यति इति विहते **परिस्तृणीत परिधत्ताग्निम्**[5] इति मन्त्रस्य सम्प्रेषे पक्षे मन्त्र उच्चैरेकश्रुत्या सकृद्भवति परिस्तरणीमेतामेके समामनन्ति इति । पक्षेतु मन्त्रकरणत्वात्। उपांशुचातुस्वर्येण प्रत्यग्नि भवति इति प्रतिपादितम्। “हविष्कृदेहि इतित्रिः अवहन्ति अन्वघ्नन् वा हविष्कृतम् आह्वयति" इति सूत्रेऽपि तत्र उक्तं चातुस्वर्येण उपांशु सकृत् च मन्त्रः करणामन्त्रत्वे, विपर्ययस्तु आह्वानार्थे इति। यत्तु उपांशुप्रयोगेऽपि याज्यासु याज्ञिकानामैकश्रुत्यकरणम्, तत् आश्वलायनादिषु विशेषवचनात् यथा उच्चैः प्रयोगेऽपि आश्रवय इत्यादौ विशेषवचनात् प्लुतउदात्तः । एवं यज्ञकर्मण्यजपन्यूङ्खसामसु इति सूत्रस्य तात्पर्यम्।

**वषट्कारप्रयोगेऽपि एकश्रुतिः**

यथा यज्ञकर्मणि इत्याख्ये सूत्रे एकश्रुतेः विधानं तथैव वषट्कारोच्चारणेऽपि। पाणिनिस्तु **उच्चैस्तरां वा वषट्कारः**[6] इत्यनेन सूत्रेण एकश्रुतेः वैकपिल्कं विधानं प्रस्तौति। उच्चैः शब्दोऽधिकरणशक्तिप्रधानोऽपि अत्र तद्विशिष्टभवनक्रियायां वर्तते । तेन क्रियाप्रकर्षात् आम्प्रत्ययः। षट्द्वेब्देन चात्र तत्समानार्थो वौषट् शब्दो लक्ष्यते । द्वावपि देवतासम्प्रदानस्य द्योतकौ । वौषट् इत्येव नोक्तम्। प्रतिपत्तिलाघवेऽपि मात्रागौरवात् । अत एव लिङ्गात् वर्णसमुदायादपि कारप्रत्ययः। तेन एव काल इत्यादि सिद्धिः । यज्ञकर्मणि वौषद्धव्यः उदात्ततरो वा भवति । पक्षे ऐकश्रुत्यम् । वषट्कारः अन्तोदात्तः वौषट् शब्दोऽपि वषट्कारोपलक्षणार्थः, तेन षट्विट् शब्दः वषट्कारस्य प्लुतः इति हरदत्तसम्मतिः । अतः एवं वक्तुं शक्यते यत् वषट्कारप्रयोगेऽपि एकश्रुतेः वैकल्पिकं विधानं वर्तते ।

**एकश्रुतेः छन्दसि विकल्पता**

अस्मिन् सूत्रप्रसङ्गे वृत्तिकृता हरदत्तेन छन्दसि एकश्रुतिः वा इति व्याख्याय **इषेत्वोर्जेत्वा**[7], **अग्निमीळे पुरोहितम्**[8] इत्यादावपि एकश्रुतिः वैकल्पिकी उदाहृता । सा सकलाध्यापकसम्प्रदायविरुद्धमिति ऋग्वेद यजुर्वेदे च त्रैस्वर्यदर्शनात् वस्तुतः सर्वेषां कृते स्वरस्य दुरवधारणत्वात् एकश्रुतेः वैकल्पिकं विधानं भगवता पाणिनिना कृतं स्यात् ।

सुब्रह्मण्याख्ये निगदे एकश्रुतिः न भवति । अतः पाणिनिः सूत्रयति **न सुब्रह्मण्यायां स्वरितस्य तूदात्तः**[9], यतो हि स्वाध्यायसमयेऽपि प्रणवस्य उदात्तता भवति । अतः अत्र ओङ्कारस्य सर्वोदात्तत्वात् स्वाध्यायादौ च सर्वैः सर्वदा प्रयुक्तत्वात् एकश्रुतिः न भवितुमर्हति। कल्पसूत्राणि एकश्रुतिमेवं परिभाषयन्ति उदात्तानुदात्तस्वरितानां स्वराणामभावः एकश्रुतिः भवति ।

यद्यपि वैयाकरणानां सम्प्रदाये विकल्पात् एकश्रुतेः विधानं कृतमस्ति किन्तु याज्ञिकानां परम्परासु त्रैस्वर्यविधानात् एकश्रुतिः बाधते। वैयाकरणानां सम्प्रदायोऽपि सविश्वासम् एकश्रुतेः परिभाषां न निर्दिशति। भट्टोजिदीक्षितः सदृशाः आचार्याः सर्वेषु वेदभागेषु त्रैस्वर्यं न स्वीकुर्वन्ति अपितु विभाषा छन्दसि इति सूत्रमुद्धृत्य वेदमन्त्रेष्वपि एकश्रुतिं विकल्पयन्ति। केचित्तु जात्यादिस्वरानेव एकश्रुतिं भणन्ति । ते तु भाषिकस्वरे, तानस्वरे, जात्यस्वरे, च अभेदान्वयं प्रसाधयन्ति तद्वस्तुतः सम्प्रदायविरुद्धमेवास्ति । वैदिकसम्प्रदायस्तु यज्ञकर्मणि एव एकश्रुतिं समर्थयति इति दिक् ।

**पादसूची:**

1. अष्टाध्यायी 1-2-33
2. अष्टाध्यायी 1-2-33
3. तैत्तिरीयसंहिता 1-5-5-1
4. शुक्लयजर्वेदसंहता 1.1.
5. तैत्तिरीयब्राह्मणम् 3.7.6.1.
6. अष्टाध्यायी 1.2.35
7. शुक्लयजुर्वेदसंहिता 1.1.
8. ऋवेदसंहिता 1.1.1.
9. अष्टाध्यायी 1.2.37

**उपयुक्तग्रन्थसूची**


1. पतञ्जलिमहाभाष्यम् - आनन्दाश्रमसंस्कृत ग्रन्थावलिः, 1938
2. वैयाकरणसिद्धान्तकौमुदी - मोतीलाल बनारसीदास - वाराणसी, 1997
3. अष्टाध्यायीसूत्रपाठः - Krishnadas academy Varanasi, 1985
4. आश्वलायन श्रौतसूत्रम् - संस्कृतकलाशाला, बनारस, 1955
5. काशिकावृत्तिः - राष्ट्रियसंस्कृत संस्थानम्, 2008
6. तैत्तिरीयसंहिता - सायणभाष्यम्, वैदिकसंसोधनमण्डलम्, पुणे, 1990
7. तैत्तिरीयब्राह्मणम् - सायणभाष्यम्, नागपब्लिषर्स, देहली, 2003
8. काण्वसंहिता - नागपब्लिषर्स, देहली, 2003
9. ऋग्वेदसंहिता - नागपब्लिशर्स, देहली, 2004
10. तैत्तिरीय प्रातिशाख्यम् - Authority of Government Maharaja of Mysore, 1906